पर्य्युदस्तः, त्रि, ( पर्य्युदस्यते इति । परि+उत्+अस+क्तः । ) पर्य्युदासविशिष्टः । विध्यन्वयिभेदात्मकनञर्थयुक्तः । यथा । यद्यपि पर्य्युदस्तरात्र्यादिषु श्राद्धादिकरणे विधेरौदासीन्यान्न फलं न वा प्रत्यवाय इति सिद्धान्तः । इति मलमासतत्त्वम् ॥ ( परित उत्क्षिप्ते त्रि ॥ )

पर्य्युदासः, पुं, परि सर्व्वतोभावेन उदास्यते विधियत्र सः । ( परि+उत्+अस्+घञ् । ) तस्य लक्षणम् श्राद्धविवेके ।

"सामान्यशास्त्रप्राप्तनिषेधस्यैव पर्य्युदासत्वम् ॥"

अपि च मलमासतत्त्वे ।

"प्राधान्यन्तु विधेर्यत्र प्रतिषेधेऽप्रधानता ।
पर्य्युदासः स विज्ञेयो यत्रोत्तरपदेन नञ् ॥"

अस्योदाहरणम् । अमावस्यायां पितृभ्यो दद्यात् रात्रौ श्राद्धं न कुर्व्वीत । अत्र श्राद्धकरणे रात्रेः पर्य्युदासः ॥ (यथा च साहित्यदर्पणे । ७ । ३ ।

"जुगोपात्मानमत्रस्तो भेजे धर्म्ममनातुरः ।
अगृध्नुराददे सोऽर्थानसक्तः सुखमन्वभूत् ॥
अत्रात्रस्ततामनूद्यात्मगोपनादेर्विधेयमिति
नञः पर्य्युदासतया गुणभावो युक्तः ॥")

पर्य्युषितं, त्रि, ( परित्यज्य स्वकालमुषितम् । वस+क्तः । ) दुष्टम् । बासि इति भाषा । तस्याभक्षणीयत्वं यथा,—

"भक्तं पर्य्युषितोच्छिष्टं श्वस्पृष्टं पतितेक्षितम् ।
उदक्यास्पृष्टसंस्पृष्टं पर्य्यायान्नञ्च वर्ज्जयेत् ॥"

इति गरुड़पुराणम् ॥

"यातयामं गतरसं पूतिपर्य्युषितञ्च यत् ।
उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियम् ॥"

इति भगवद्गीता ॥ * ॥

तस्य भक्ष्यत्वं यथा,—

"मन्त्राभिमन्त्रितं शस्तं न च पर्य्युषितं नृप ! ।
अन्यत्र फलमांसेभ्यः शुष्कशाकादिकात्तथा ॥
तण्डुलादरिकेभ्यश्च गुड़पक्वेभ्य एव च ॥"

इत्याह्निकतत्त्वम् ॥

तुलसीयुक्तपुष्पे पर्य्युषितदोषाभावो यथा,—

"तुलसीतम्रपुष्पाणि पद्मं गङ्गोदकं कुशाः ।
न पर्य्युषितदोषोऽत्र छिन्नभिन्नं न दुष्यति ॥"

इति पुराणम् ॥

पर्य्युषितभोजी, [ न् ] त्रि, ( पर्य्युषितं दुष्टं भुङ्क्ते इति । भुज+णिनिः । ) दुष्टद्रव्यभोक्ता । इति कलापव्याकरणम् ॥

पर्य्येषणा, स्त्री, ( इष्+युच्+टाप् । ततः परित एषणा । ) अन्वेषणा । इत्यमरः । २ । ७ । ३२ ॥ तर्कादिना यथाबोधितधर्म्माद्यन्वेषणे । अन्वेषणमात्रेऽपि । इति भरतः ॥ ( स्त्री, अन्वेषणम् । यथा, महाभारते । ३ । २६ । १८ ।

"ब्राह्मणेष्वेव मेधावी बुद्धिपर्य्येषणाञ्चरेत् ॥" )

पर्व्व, गतौ । ( भ्वां-परं-सकं-सेट् । ) पर्व्वति । इति दुर्गादासः ॥

पर्व्व, पूर्त्तौ । इति कविकल्पद्रुमः ॥ ( भ्वां-परं-सकं-सेट् । ) पर्व्वति पयसा कुम्भं चेटी । इति दुर्गादासः ॥

पर्व्व, [ न् ] क्ली, ( पर्व्वतीति । पर्व्व गतौ+बाहुलकात् कनिन् । यद्वा, पिपर्त्तीति । पॄ+"स्नामदिपद्यर्त्तिपॄशकिभ्यो वनिप् ।" उणां । ४ । ११२ । इति वनिप् । ) महः । ग्रन्थिः । (यथा, भागवते । ५ । २१ । १७ । "तथा बालखिल्या ऋषयोऽङ्गुष्ठपर्व्वमात्राः षष्टिसहस्राणि पुरतः सूर्य्यं सूक्तवाकाय नियुक्ताः संस्तुवन्ति ॥" ) प्रस्तावः । लक्षणान्तरम् । दर्शप्रतिपदोः सन्धिः । (पूर्णिमाप्रतिपदोःसन्धिश्च । यथा, साहित्यदर्पणे ।

"अकालजलदावली किरतु नाम मुक्तावलीरपर्व्वणि विधुन्तुदस्तुदतु नाम शीतद्युतिम् ॥" )

विषुवत्प्रभृति । इति मेदिनी । ने, ८८ ॥ ग्रन्थविच्छेदः । इति त्रिकाण्डशेषः ॥ ( यथा, महाभारते अष्टादशपर्व्वाणि । तानि उक्तानि यथा तट्टीकायाम् ।

"आदिः सभावनविराटमथोद्यमञ्च
भीष्मो गुरू रविजमद्रकसौप्तिकञ्च ।
स्त्रीपर्व्व शान्तिरनुशासनमश्वमेध-
व्यासाश्रमौ मुषलयानदिवावरोहः ॥")

क्षणः । इति शब्दचन्द्रिका ॥ ( भङ्गी । यथा, रघुवंशे । १६ । ४६ ।

दिने दिने शैवलवन्त्यधस्तात्
सोपानपर्व्वाणि विमुञ्चदम्भः ॥" )

पञ्चपर्व्वाणि यथा । विष्णुपुराणम् ।

"चतुर्द्दश्यष्टमी चैव अमावास्याथ पूर्णिमा ।
पर्व्वाण्येतानि राजेन्द्र ! रविसंक्रान्तिरेव च ॥
स्त्रीतैलमांससम्भोगी पर्व्वस्वेतेषु वै पुमान् ।
विण्मूत्रभोजनं नाम प्रयाति नरकं मृतः ॥"

पर्व्वसु कर्त्तव्याकर्त्तव्यानि यथा । ब्रह्मपुराणे ।

"नित्यं द्वयोरयनयोर्नित्यं विषुवतोर्द्वयोः ।
चन्द्रार्कयोर्ग्रहणयोर्व्यतीपातेषु पर्व्वसु ॥
अहोरात्रोषितः स्नानं श्राद्धं दानं तथा जपम् ।
यः करोति प्रसन्नात्मा तस्य स्यादक्षयञ्च तत् ॥"

पराशरभाष्ये कूर्म्मपुराणम् ।

"अनध्यायस्तु नाङ्गेषु नेतिहासपुराणयोः ।
न धर्म्मशास्त्रेष्वन्येषु पर्व्वस्वेतानि वर्ज्जयेत् ॥"

पैठीनसिः । न पर्व्वसु तैलं क्षौरं मांसमभ्युपेयात् नामावस्यायां हरितमपि छिन्द्यात् । इति तिथ्यादितत्त्वम् ॥

पर्व्वकं, क्ली, ( पर्व्वणा ग्रन्थिना कायतीति । कै+कः । ) ऊरुपर्व्व । इति शब्दचन्द्रिका ॥ आँटु इति भाषा ॥

पर्व्वकारी, [न्] पुं, (पर्व्व करोतीति । पर्व्व+कृ+णिनिः ।) धनादिलोभेनापर्व्वसु अमावास्याक्रियाप्रवर्त्तकः । यथा, विष्णुपुराणे द्वितीयांशे ६ त्र्यः ।

"सूची माहिषकश्चैव पर्व्वकारी च यो द्विजः ॥"

पर्व्वगामी, [ न् ] पुं, ( पर्व्वसु चतुर्द्दश्यष्टम्यादिषु गच्छति स्त्रियमिति । पर्व्व+गम+णिनिः । ) पर्व्वसु स्त्रीगामी । इति पूर्व्वोक्तश्लोके पर्व्वकारीत्यत्र पर्व्वगामीति पाठद्वैधे स्वामी ॥

पर्व्वतः, पुं, ( पर्व्वति पूरयतीति । पर्व्व पूरणे+"भृमृदृशियजिपर्व्विति ।" उणां । ३ । ११० । इति अतच् । ) यद्वा, पर्व्वाणि भागाः सन्त्यत्र । पाहाड़ इति भाषा ॥ तत्पर्य्यायः । महीध्रः २ शिखरी ३ क्ष्माभृत् ४ अहार्य्यः ५ धरः ६ अद्रिः ७ गोत्रः ८ गिरिः ९ ग्रावा १० अचलः ११ शैलः १२ शिलोच्चयः १३ । इत्यमरः । २ । ३ । १ ॥ स्थावरः १४ सानुमान् १५ पृथुशेखरः १६ धरणीकीलकः १७ कुट्टारः १८ जीमूतः १९ धातुभृत् २० भूधरः २१ स्थिरः २२ कुलीरः २३ कटकी २४ शृङ्गी २५ निर्झरी २६ अगः २७ नगः २८ दन्ती २९ । इति शब्दरत्नावली ॥ धरणीध्रः ३० भूभृत् ३१ क्षितिभृत् ३२ अवनीधरः ३३ कुधरः ३४ धराधरः ३५ प्रस्थवान् ३६ वृषवान् ३७ । इति राजनिर्घण्टः ॥ * ॥ सुमेरोः पूर्व्वे पर्व्वता यथा,—

"शीतान्तश्चक्रमुञ्जश्च कुलीरोऽथ कङ्कवान् ।
मणिशैलोऽथ वृषवान् महानीलो भवाचलः ॥
सुबिन्दुर्मन्दरो वेणुः सुमेघो निमिषस्तथा ।
देवशैलस्य पूर्व्वेण मन्दरस्य महाचलाः ॥" * ॥

सुमेरोर्दक्षिणे पर्व्वता यथा,—

"त्रिकूटः शिखराद्रिश्च कलिङ्गोऽथ पतङ्गकः ।
रुचकः सानुमांश्चैव ताम्रकोऽथ विशाखवान् ॥
श्वेतोदरः समलश्च वसुधारश्च रत्नवान् ।
एकशृङ्गो महाशैलो गजशैलः पिशाचकः ॥
पञ्चशैलोऽथ कैलासो हिमवांश्चाचलोत्तमः ।
इत्येते दक्षिणे पार्श्वे मेरोः प्रोक्ता महाचलाः ॥"

सुमेरोः पश्चिमे पर्व्वता यथा,—

"सुचक्षुः शिशिरश्चैव वैदूर्य्यः पिङ्गलस्तथा ।
पिञ्जरोऽथ तथा भद्रः सुरसः कपिलो मधुः ॥
अञ्जनः कुक्कुटः कृष्णः पाण्डुरश्चाचलोत्तमः ।
सहस्रशिखरश्चाद्रिः पारिपात्रः स शृङ्गवान् ॥
पश्चिमेन तथा मेरोर्विष्कम्भात् पश्चिमाद्बहिः ।
एतेऽचलाः समाख्याताः शृणुष्वातस्तथोत्तरान् ॥"

सुमेरोरुत्तरे पर्व्वता यथा,—

"शङ्खकूटोऽथ ऋषभो हंसनाभौ तथाचलौ ।
कपिलेन्द्रस्तथा शैलः सानुमान्नील एव च ॥
शतशृङ्गः स्वर्णशृङ्गः तुम्राको मेघपर्व्वतः ।
विराजाख्यो वराहाद्रिर्मयूरो रुचिरस्तथा ॥
इत्येते कथिता ब्रह्मन्मेरोरुत्तरतो नगाः ॥"

इति मार्कण्डेयपुराणम् ॥ * ॥

सप्तकुलपर्व्वतादि यथा,—

"सप्त येऽस्मिन् महापर्व्वा विस्तृताः कुलपर्व्वताः ।
महेन्द्रो मलयः सह्यः शुक्तिमानृक्षवानपि ॥
विन्ध्यश्च पारिपात्रश्च इत्येते कुलपर्व्वताः ।
तेषां सहस्रशश्चान्ये पर्व्वतास्तु समीपतः ॥
अविज्ञाताः पर्व्ववन्तो विपुलाश्चित्रसानवः ।
अन्ये तेभ्योऽपरिज्ञाता ह्रस्वाः स्वल्पोपजीविनः ॥
तैर्विमिश्रा जनपदा आर्य्या म्लेच्छाश्च सर्व्वशः ॥"

इति मात्स्ये ९५ अध्यायः ॥ * ॥

विंशतिः श्रेष्ठपर्व्वता यथा,—

"हिमवान् हेमकूटश्च निषधो नीलपर्व्वतः ।
श्वेतश्च शृङ्गवान् मेरुर्माल्यवान् गन्धमादनः ॥